संस्कृतवार्ता:
26.10.2024
सायम् - 06:20

<u>मुख्यवार्ताः</u>

- राष्ट्रपति पदासीना द्रौपदीमुर्मु: प्रावोचत् यत् देशस्य समग्रविकासाय जनजातियजनानां सक्रिय सहभागित्वम् आवश्यकमस्ति।
- प्रधानमन्त्री नरेन्द्रमोदी श्व: प्रात: एकादशवादने 'मन की बात' इत्यस्मिन् कार्यक्रमे देशवासिभिस्साकं विचारान् विनिमयी करिष्यति।
- स्पेनदेशीय: राष्ट्रपति: पेड्रो-सांचेज-इत्येष: श्व: आरभ्य भारतयात्रायाम् आयाति।
- भारत ऋतु-विज्ञान-विभागेन ओडिशा-राज्यस्य विभिन्नेषु भागेषु अतिवृष्टि: अनुमानिता तत्र साहाय्यकार्याणि प्रचलन्ति।
- पुणेनगरे क्रिकेट् निकषस्पर्धायां न्यूजीलैण्ड दलेन भारतं पराभूय तिसृणां क्रिकेटनिकषस्पर्धानां श्रृंखला विजिता।

<u>राष्ट्रपति</u>

राष्टर्पतिपदासीना द्रौपदीमुर्मु: प्रोक्तवती यत् आदिवासिनः जना: प्राकृतिक जीवनशैल्या संचितज्ञानस्य सङ्ग्रहा: सन्तीति। भारतीय-प्रौद्योगिकी संस्थानस्य आईआईटी इत्याख्यस्य भिलाईइत्यस्य दीक्षान्तसमारोहाय उपस्थितान् जनान् सम्बोधयन्ती राष्ट्रपतिः मुर्मुः कथितवती यत् जनजातियजनानां जीवनशैल्या देशस्य सततविकासाय महत्वपूर्ण योगदानं दातुं शक्यते । अनया कथितं यत् देशस्य सर्वविधविकास: तदा सम्भाव्यते यदा विकासप्रक्रियायाम् आदिवासि-जनानां सक्रियसहभागिता स्यादिति । समारोहावधौ राष्ट्रपतिना सप्त छात्रेभ्य: स्वर्णपदकं प्रदत्तम्। एतस्मिन् समारोहे छत्तीसगढस्य राज्यपालः रामेनडेका इत्यसौ मुख्यमन्त्री विष्णुदेव साई च उपस्थितौ आस्ताम् ।

<u>मन की बात-कार्यक्रम:</u>

प्रधानमन्त्री नरेन्द्रमोदी श्व: रविवासरे स्वीये "मन की बात" इत्यस्मिन् कार्यक्रमे देशवासिभिः साकं विचार-विनिमयं करिष्यति। "मन की बात" इति मासिक-कार्यक्रमस्य इदं पञ्चदशाधिक एकशतं संस्करणं भविष्यति। अस्य कार्यक्रमस्य प्रसारणम् आकाशवाण्याः दूरदर्शनस्य च सर्वाभिः वाहिनिभिः प्रसारयिष्यते। अयं कार्यक्रमः आकाशवाणी-दूरदर्शनम्-प्रधानमन्त्री-कार्यालय-सूचनाप्रसारण-मन्त्रालय-इत्येतेषां यूट्यूब-वाहिनीष्वपि द्रष्टुं शक्यते इति। प्रधानमन्त्रिणः सम्बोधनानन्तरम् अनुक्षण अयं कार्यक्रमः क्षेत्रीय-भाषास्वपि श्रोतुं शक्यते। क्षेत्रीय-भाषासु अस्य पुनः प्रसारणं रात्रौ भविता।

## स्पेन-राष्ट्रपति:

स्पेनदेशस्य राष्ट्रपति: पेड्रो-सांचेज-इत्यसौ श्व: आरभ्य अस्य मासस्य नवविंशतिदिनांकं यावत् भारतस्य आधिकारिकयात्रायाम् आयाति। तेन सह तस्य भार्या बेगोना-गोमेज-इत्यसौ च आगच्छति। विदेश-मन्त्रालयेन एकस्मिन् प्रदत्ते वक्तव्ये कथितं यत् श्रीसांचेजस्य इयं प्रथमा भारतयात्रा भविष्यति। इत: पूर्वं प्रधानमन्त्री नरेन्द्रमोदी राष्ट्रपति: सांचेज: च बहुपक्षीयोपवेशनेषु अनेकवारं मिलितवन्तौ। यात्राप्रवासे राष्ट्रपति: सांचेज: प्रधानमन्त्रिणा श्रीमोदिना साकं मण्डलस्तरीयां वार्तां समाचरिष्यति। उभौ नेतारौ वडोदरायां सी-पञ्चनवत्यधिक-द्विशतं इत्याख्यस्य विमानस्य स्थापित संयंत्रस्य उद्घाटनं विधास्यत:। एतद्धि विमानन क्षेत्रे मेक इन इण्डिया इत्यस्य उपक्रमस्य अन्तर्गतं भारतेन विहित: प्रमुख: पदक्षेपो वर्तते।

## प्रधानमन्त्री-गुजरातयात्रा

प्रधानमन्त्री नरेन्द्रमोदी अस्य मासस्य अष्टाविंशे दिनांके गुजरातराज्यं प्रति याति। सत्र असौ विभिन्न विकासात्मक-परियोजनानां शिलान्यासम् उद्घाटनं च करिष्यति। यात्रावधौ श्रीमोदी स्पेनदेशीय: प्रधानमन्त्री पेड्रो-सांचेज- इत्यसौ च टाटा-एडवान्सड-सिस्टम-लिमिटेड-परिसरे सी-पञ्चनवत्य द्विशतं इत्येतस्य विमानस्य निर्माणाय टाटा-विमान-परिसरस्य उद्घाटनं करिष्यत:।

तदनु प्रधानन्त्री श्रीमोदी अमरेलीस्थले भारतमातासरोवरस्य उद्घाटनम् अथ च नवशताधिक-चतु:सहस्रं-कोटिरूप्यकाणां परियोजनानाम् आधारशिलामपि स्थापयिष्यति। अपि जलापूर्ति-विभागस्य सप्तशत-कोटिरूप्यकाणां विकासपरियोजना: अपि उद्घाटयिष्यति। प्रधानमन्त्री पर्यटन-सम्बंद्धानां पदक्षेपाणाम् आधारशिलां संस्थापयिष्यति येषु पोरबन्दर-जनपदस्य मोकरसागरे करली-रिचार्ज-जलाशयस्य विश्वस्तरे पारितान्त्रिक-पर्यटनत्वेन संशोधनं सम्मिलितमस्ति।

## ओडिशा-चक्रवात:

ओडिशाराज्ये तटीयजनपदानां गंभीरतया चक्रवात प्रभावितेषु क्षेत्रेषु साहय्ययोद्धार पुनर्निर्माणकार्याणि च विधीयन्ते। यतो हि अनेन दाना चक्रवातेन विद्युस्तम्भाः वृक्षाः गृहाणि च क्षतिग्रस्तानि जातानि। अवधेयं वर्तते यत् गभीरचक्रवातः दाना इति विगतयो: गुरुशुक्रवासरयोः मध्यरात्रौ ओडिशातटस्य भीतरकनिका राष्ट्रियोद्यान -धामरा- इत्यनयोः मध्ये प्रविष्टः ।

भारत-ऋतु-विज्ञान-विभागेन सूचितं यत् अयं चक्रवातः साम्प्रतम् ओडिशायाः उत्तरभागेषु निम्नभारतमुनेषु क्षेत्रेषु सङ्कुचितः जात:। ओडिशायाः एवं भद्रक-केन्द्रपाड़ा - बालासोर – जाजपुर-मयूरभञ्ज- जनपदेषु चक्रवातेन अतिवृष्टिः जाता। अत्रावधौ तत्र जवीयगत्या

पुनर्निर्माणस्य कार्याणि प्रचलन्ति। तत्रैव राज्यप्रशासनेन घोषितं यत् क्षतिग्रस्तानि गृहाणि निर्मीयन्ते तावत् जनेभ्यः पुनर्निमितानि नवीनानि गृहाणि प्रदास्यन्ते ।

## मुख्यन्यायाधीश:

मुख्यन्यायाधीश: डी.वाई.चन्द्रचूड: उक्तवान् यत् न्यायपालिकां समेत्य सर्वेषु क्षेत्रेषु महिलानां अधिकाधिकं सहभागिता भवितव्या इति। आकाशवान्या सह विशिष्ट संवादे एकस्मिन् असौ उक्तवान् यत् अनेन महिलानां पक्षाणां सूचना निर्णयाश्च सरला: भविष्यन्ति। आकाशवाण्या सह स्वीये प्रारम्भिके एव सम्वादे असौ निगदितवान् यत् स: बाल्यादेव आकाशवाणीतः प्रसारितानां हिन्दी-आङ्ग्ल-संस्कृत-वार्तानां श्रवणं करोति स्म ।

## झारखण्ड-विधानसभा

झारखण्ड-विधानसभा-निर्वाचनस्य प्रथम-चरणाय नामाङ्कनप्रक्रिया ह्य: सम्पन्ना। एतस्मिन् प्रथमे चरणे राज्यस्य त्रिचत्वारिंशत्-नैर्वाचनिक-क्षेत्रेभ्य: नवम्बरमासस्य त्रयोदशदिनाङ्के मतदानं भविष्यति। नामाङ्कनपत्राणाम् अनुसन्धेयकार्यम् अस्यमासस्य अष्टाविंशति दिनाङ्के अथ च नामाङ्कन प्रत्यावर्तनं त्रिंशद्दिनाङ्कं यावत् प्रत्याशिन: कर्तुं शक्नुवन्ति।

## टेबल-टेनिस-स्पर्धा

कनिका-बत्रा इत्येषां टेबल-टेनिस प्रतिस्पर्धायां अरचयत्। यतोहि सा विश्व-टेबल-टेनिस्-चैम्पियन प्रतिस्पर्धायां प्रागुपान्त्य-चक्राय योग्यतां प्राप्य प्रथमा भारतीय क्रीडिका जाता। फ्रांस देशस्य मोटंपेलियर-नगरे गतदिने भारतीय-टेनिस-क्रीडिका मनिका रोमानिया-देशस्य बर्नडेट स्ज़ोक्स इत्येतां त्रीणि-एकं अङ्केन पराजयत।

## संस्कृत-साप्ताहिकी

संस्कृतजगता सम्बद्धै: विभिन्नै: क्रियाकलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ.एम.गोल्ड-प्रवाहिकात: रविवासरे मध्याह्ने सार्धैक-वादनत:भविष्यति।

।।इति वार्ता:।।